माणयोरपिप्रातिस्विकरूपेणप्रतिबंधकत्वेप्रतिबंधकतावच्छेदकवैजात्यस्वीकारेगौरवा
तत्सत्त्वेनकिंचि ६द्बाधकंनचज्ञानादियोग्यगुणेष्ववैजात्यंस्वीकृत्यविजातीयगुण
६. विषयकमानसंप्रतिविजातीयगुणत्वेनहेतुत्वातादृशवैजात्यस्यतत्तत्संख्यापरिमाणयोः
स्वीकारेगौरवात्तयोरपिअयोग्यत्वमितिवाच्यंमनःसंयुक्तसमवायेनविजातीयगुणंविना
पिआत्मत्वमानस्यजननाद्विजातीय६गुणस्यविशेषसामग्रीत्वासंभवेनसामान्यसामग्री
बलात्संस्कारप्रसक्त्यापत्तिवारणायविजातीयगुणभेदत्वेन हेतुतायाआवश्यकत्वात्आ

त्मचमानसेआत्मत्वेनापिहेतुत्वंकल्पितंचास्मामाध्यस्यामग्राह्यफलेजननीयेविजातीय
गुणात्मत्वयोरभावेतेस्यसहकारित्वकल्पनेनसंस्कारप्रसङ्गापत्तिवारणेचतिगौरवात्
तदपेक्ष्यविजातीयगुणभेदत्वेनकारणतापरैरौचित्यादितितयोःप्रसङ्गस्वीकारएवो
चितइत्यस्वरसःस्वीकृतइत्यनेनसूचितः।इत्यमिति।आत्मनःआत्मसमवेतगुणानां
चमनोयोगपक्षेइत्यर्थः।परात्मापुरुषांतरीयात्मातद्गुणाश्चपरात्मसमवेतगुणाश्चेत्यर्थः।
चकारेणगुणसमवेतजात्यादीनांतदभावानांचसंग्रहः।समाधत्तेनेति।परायोगपक्षा

रे। पुरुषांतरीयमनसोऽयोग्यत्वात्। आत्ममानस्यत्वावछि न्नंप्रतिवि जातीयमनः संयोगत्वेना
त्मस्यमवेतमानसंप्रतिवि जातीयमनः संयुक्तस्यमवायत्वेनात्मस्यमवेतस्यमवेतमानसंप्रति
वि जातीयमनः संयुक्तस्यमवेतस्यमवायत्वेनेत्यादिनाकार्यैकार्यैकारणभावकल्पनात्पु
रुषांतरीयात्मद्रव्यीयमनसोः संयोगेचवै जात्यानभ्युपगमेननतस्यत्वापत्तिरितिभा
वः। परमाण्वादयोपिगृह्येरन्निति। परमाण्वादि षुचक्षुः संयोगस्यत्वादितिभावः तेषां
परमाण्वादीनांचक्षुर योग्यत्वादिति। चक्षुर्जन्यलौकिकस्याक्षात्कारा योग्यत्वादित्यर्थः।

वक्ष्यमाणलौकिकचाक्षुषसामग्र्यभावादिति भावः। महदिति। द्रव्यवृत्तिलौकिकविषयता
संबंधेन द्रव्यचाक्षुषं प्रति समवायेन महत्त्वेन। एवं उद्भूतरूपत्वेन च हेतुतेत्यर्थः।
परमाणौ महत्त्वाभावात्। आत्मनि रूपाभावात्। पिशाचादेश्चोद्भूतरूपवत्त्वाभावाच्च
प्रत्यक्षाभिसारं कंडलार्थः। तदेवाह। परमाणुश्चेत्यादिना। तद्रूपस्य पिशाचादिरूप
स्यानुद्भूतत्वात्। उद्भूतभिन्नत्वात्। यद्यपि पिशाचादिशरीरस्यावयवीपदेन तत्स्वरूपा
भावात्। तद्रूपस्यानुद्भूतत्वादिसमसंगतं। तथापि पिशाचादिपदेन तन्निमित्तकारण

यामकत्वकल्पेननचैतेविजातीयसंयोगइतिवाच्यं।अनंतोत्तरदेशानांविजातीय
संयोगेनियामकत्वकल्पनापेक्षयामहद्भूतरूपादिहेतुयौतावेवोचितत्वादितिदि
क्।एकेइत्थंनेनासंभवःसूचितः॥सचोद्भूतत्वस्यजातित्वेनीलत्वादिनासंकरप्रसंगः।
नचनीलत्वादिव्याप्यंनानेवोद्भूतत्वमितिवाच्यं।तथासतिचाक्षुषत्वावच्छिन्नंप्रतिउ
द्भूतरूपत्वेनकारणत्वानुपपत्तिः।कारणानुगमेनव्यभिचारादितिं।अनुद्भूतत्वेति।
नचनीलत्वादीनांसांकर्यमत्रापीतिवाच्यं।नीलत्वादिव्याप्यनानाद्भूतत्वस्यैवोपगमा

६३

वाऽनुद्भूतत्वाभावकूटविशिष्टरूपत्वेनचप्रत्यक्षंप्रतिहेतुत्वेनव्यभिचाराभावात्।
इतिभावः।नसंगाच्चक्षुर्योगगुणानाहायोगगुणाइत्यादिनायोगइवरूपमिति।
चक्षुर्योगइवृत्तिरूपमित्यर्थः।तन्मात्रेति।योगइवमात्रवृत्तीत्यर्थः।ननुतन्मात्रवृ
त्तीत्यत्रमात्रपदमनर्थकमित्यतआहामात्रपदमिति।घटाकाशसंयोगस्याकाशेवृत्तिम
त्वेनयोगइवमात्रवृत्तित्वमितिभावः।ननुत्वाचप्रत्यक्षेचक्षुसंयोगस्यहेतुत्वात्।पर
माणुवायुपभादीनांस्पार्शानापत्तिरितित्वगिंद्रियोगइवंचागृह्यतइत्येवंवा

६४ र्थं। तत्र किंतद्योग्यमिति हृदि कृत्वा श्लोकपादमाह। स च इति। महदित्यादिना। तथा च द्रव्यवृत्ति
लौकिकविषयतासंबंधेन स्वाश्रयसंयुक्तसमवेतसमवायसंबंधेन च प्रत्यक्षं प्रति महत्त्वेनोद्भूतरूपेण च हेतुत्वान्न प्रत्यक्षापत्ति
रितिभावः। सामान्यतोबहिरिंद्रियप्रत्यक्षत्वावच्छेदेनप्रतियोद्भूतरूपत्वेनहेतुत्वात्वा च प्रत्यक्षेपि
रूपंहेतुः। तेनवा योनेप्रत्यक्षमितिहृदयंयथाक्रमंपरमाण्वादिप्रत्यक्षंवारयति। तेनेत्या
दिना। प्रभाया इति। न च प्रभाहितेजसोरूपमित्यनेनौष्ण्यारूपत्वमेवनतुद्रव्यत्वमितिवाच्यं।
तन्न्यमतानुसारेणैवतदुक्तत्वादिति। प्रसंगात्त्वगिंद्रियेणगुणानाह। गुणाश्चेत्या
दि। न चेयोग्याइतिशेषः। चक्षुषोयोग्यस्परूपस्यापि च चाक्षुषापत्तिप्रसंगात्तद्रूपा

तिरिक्ताइतिमहदुद्भूतस्पर्शवत्त्वान्नात्वेतिनात्वंचतदितराद्भूतिकेस्पर्शतद्भूतिकं
महद्भूतस्पर्शीश्चेतिसामानाधिकरण्येनमहत्त्वविशिष्टउद्भूतस्पर्शीश्चेत्यर्थः।न
नुचक्षुषोयोग्याइतिव्यर्थमतआह।व्यतएवेतिव्यतएवचक्षुर्योग्यत्वंविशेषणादेवावा
प्तिवायुपरिमाणस्यचक्षुर्योग्यत्वादितिभावः।ननुउद्भूतस्पर्शवत्वेतेश्चक्ष्मर्यो
ग्यशुक्लरूपेवाप्रसिद्ध्यात्तेनैवतत्सत्त्वापत्तिवारणेकृतंमहदिसादिविशेषणेनेत
आहान्नचेतितथाचप्रभापरिमाणस्यचक्षुर्योग्यत्वात्तस्यापिवाचप्रसक्त्यापत्तिरतः

६५ तद्धि शैषणमावश्यकमेवेति भावः। न च चक्षुर्योगपत्वविशेषणेनैव परमाणुगुणा
रणेऽत्रपृथक्त्वमहदिसादिविशेषणस्यवैय्यर्थ्यमितिवाच्यं तृटिपरिमाणस्यापि न
वारणायप्रकृष्टमहत्वपरत्वयातदुपादानस्यावश्यकत्वात्। मात्रपदव्यावृत्तिमाह। न
वाघटेति। उद्भूतस्पर्शवन्मात्रावृत्तिचात्। उद्भूतस्पर्शवदितरवृत्तिचात्। तथाचतदितेरा
वृत्तित्वरूपंतन्नोक्तवृत्तित्वंतस्यनेतिभावः। तन्नहिप्रभायांहिकर्मचेति। स्वयोग्यद्रव्यसमवे
तंकर्मस्वयोग्यमिसर्थः। वायोरपिस्पर्शोनप्रत्यक्षवादिमीमांसकमतंदर्शयति। मी

मो सका श्वि स्यादि ना।लाघ वा स्वा चप्र स क्षेरू पस्य हेतु स्वा क त्पनेन लाघ वात्। महदि ति। मह
उ ~~हूत रू~~ स्व वि शि ष्टो हूत रू पैं। सर्थः तप्र यो जकं। स्वा च प्र स क्षप्र यो ज क। गौर वा त्प्रका
स्या र्थी न वा र णा यो हूत स्य र्थी हेतु स्वा व रू प क त या स्वा च प्र स क्षं प्र ति रू पस्य हेतु स्वे
गौर वात्। अत इ ति। उ हूत रू पस्य स्वा च प्र स क्षेऽप्र यो ज क स्वा दि स र्थः। ब हि रिं द्रि ये
ति। आत्म प्र स क्षेण्य क्षि चा र वा र णा य व हि रिं द्रि य ज न्य नि वे शः। अ त र व नि स न्ता धार
ण प न पि ने ति भा वः। त द भा वा त्। उ हूत रू पा भा वा त्। नै व मि ति। न वा यो स्या र्थी न

प्रत्यक्षमिति भावसाधनस्य धर्मः। लाघवादिति। बहिरिन्द्रियजन्यद्रव्यसाक्षात्कारत्वापेक्षया द्रव्यचाक्षुषत्वस्यैव कार्यतावच्छेदकत्वेलाघवादिति सर्वधर्मः। अत्रमीमांसकानामयमाशयः। आत्मप्रत्यक्षेऽभिचारवारणायबहिरिन्द्रियजन्यद्रव्यप्रत्यक्षत्वस्यकार्यतावच्छेदकत्वेगौरवादनुद्भूतरूपस्यकार्यतावच्छेदकंबहिर्द्रव्यप्रत्यक्षत्वंवा चक्षुर्बहिर्द्रव्यआत्मान्यत्वंवा मानसविषयान्यत्वंवेतिविनिगमनाविरहः। अथमूर्तप्रत्यक्षत्वमेवतत्कार्यतावच्छेदकंस्यादसमवायिकारणतावच्छेदकतयाचमैतैवं जातिरितिचेत्तथापिप्रभायाः

स्पार्शनवारणा योद्भूतस्पार्शनंप्रतिहेतुत्वावश्यकतया चाक्षषमेवरूपज
न्यतावच्छेदकमुपपद्यतेनतुप्रत्यक्षत्वंवायोः प्रत्यक्षत्वसंदेहेनतत्स्पर्शंदिग्धत्वमि
चारकत्वातदुक्तोपरिस्पन्दविनिश्चितामपिचारकंरूपंगृह्यमाणत्वमिचारके
णकार्यत्वकल्पनायाश्चयोगादिति।तथाचवायोःस्पार्शनेबाधकाभावः। साधिका
चस्पर्शोयंमेदोविहरतिइत्यादिप्रतीतिः। नचोद्भूतस्पर्शनवायोरनुमानाप्रतादृशा
प्रतीत्यनुपपत्तिरितिवाच्यं।आम्रंपक्वंमधुरंचेत्यादिप्रतिसंधानंविनापितादृशप्रतीतेर्जायमान

त्वात् अन्यथा घटस्य श्यामीस्यादिप्रतीतिरप्यनुमानादिनोपपत्तौ घटादीनामपि स्पार्शनोच्छेदापत्तिरिति। अत्राङ्कु
र्नैय्यायिकाः कारणाभावात्कार्याभाव इति प्रतीत्या कार्यसामान्याभावे कारणाभावस्य प्रयोजकत्वं तत्र च
मूर्तप्रत्यक्षत्वावच्छिन्नं प्रति उद्भूतरूपत्वेन हेतुत्वे प्रत्यक्षसामान्याभावे उद्भूतरूपाभावस्योद्भूतस्पर्शाभावस्येति
विशेषाभावकूटस्य प्रयोजकत्ववाच्यमिति गौरवात् मन्मते चोद्भूतरूपाभावस्येति लाघवं उद्भूतरूपत्वेनाकारणत्वे
चतदवच्छिन्नाभावस्य प्रयोजकत्वासंभवात् तदुद्भूतत्वमावश्यकमेव ननु तर्हि उद्भूतस्पर्शत्वेन हेतुत्वमादाय वि
निगमनाविरहः भवन्मतेऽप्ययोरियमन्यतेऽपि प्रभायाः प्रत्यक्षानङ्गीकारादिति चेन्न दूरोपसरदरविहंगमइत्य
त्र प्रभामण्डलस्यैवोपरि देशतया तस्यचप्रत्यक्षानङ्गीकारे दूरविहंगमदर्शनानुपपत्तेः॥ संयोगप्रत्यक्षेया
वदाश्रयप्रत्यक्षस्यचहेतुत्वात् एवंसंयोगविभागलिङ्गकचेष्टादेरागत्यनुमानंनस्यात् नचपूर्वोत्तरदेशयोः
अवयवेरुपलंभानुपलंभाभ्यां संयोगविभागयोरनुमानात् ताभ्यांगत्यनुमानमिति वाच्यं प्रभामण्डलरूपयोः

वायुस्पर्शस्पर्शानानुपपत्तिः। चतुरणुकस्पर्शनेऽव्याप्तिचारवारणायस्पर्शविजातीयत्व
निवेशः। वैजात्यं चेदं इत्थंव्यावृत्तंगुणकर्मस्पर्धारहितं। न चप्रतिबध्यतावच्छेदककोटौवि-
जातीयस्पर्शस्पर्शीयत्वनिवेशान्नानुपपत्तिरितिवाच्यं। तथास्पर्शविजातीयस्पर्शी
यत्वयोर्विशेषणविशेष्यभावेविनिगमनाविरहप्रसंगात्। एवंत्वक्संयुक्तसमवायरूपसा
माग्रयसामग्र्यास्पर्शानाभावाभावरूपकारणंविनापिवायुस्पर्शस्पर्शनजननात्त
स्यविशेषसामग्र्यीत्वासंभवेनत्वक्संयुक्तसमवायरूपसामाग्रयसामग्रीबलाद्गगन
घटसंयोगस्पर्शानापत्तेर्दुर्वारत्वाच्च। नचस्पर्शस्पर्शनंप्रतिस्पर्शत्वेनापिहेतुत्वक

नापतेर्दुर्वारत्वात्सद्भिन्नस्पार्शनेप्रतितादात्म्यसंबंधेनसद्भिन्नत्वेनापिकारण
त्वंकल्पित्वासामाग्यसामग्र्याफलेजननीयेतादृशप्रतिबंधकाभावसद्भिन्नो
रन्यतरस्यसहकारित्वंकल्पनातदापत्तिवारणेचतिभोरत्वात्।तदपेक्ष्यगगनघट
संयोगस्पार्शनवारणायस्पार्शनाभावविशिष्टविजातीयसत्त्वेनैवतादात्म्ये
नप्रतिबंधकत्वौचित्यात्।विजातीयसत्त्वेस्पार्शनाभाववैशिष्ट्यंचसामानाधिक
रण्यघटितसामानाधिकरण्यसंबंधेनानचविजातीयसत्त्वस्पार्शनाभाव

योऽग्निरोषणाविरोष्यभावेविनिगमनाविरहइतिवाच्यं। विजातीयसत्वविशि
ष्यास्पर्शनाभावत्वेनप्रतिबंधकत्वेसमानाधिकरणेवप्रतिबंधकतावच्छेदकसंबंध
तयागौरवात्।स्पार्शनाभावविशिष्टविजातीयसत्वेनप्रतिबंधकत्वेतुतादात्म्यस्यै
वप्रतिबंधकतावच्छेदकतयालाघवात्।प्रतिबध्यतावच्छेदकंचस्पार्शनत्वंस्पार्शनत्वं।
तेननवायोरप्रत्यक्षत्वेपिनतत्स्पर्शस्पार्शनेव्यभिचारः।नचतादृशप्रतिबंधकाभा
वंविनापिवायुस्पर्शस्पार्शनंजननानास्पविशेषसामग्रीत्वासंभवेनसामान्यसाम

गीबलात्गमनघटसंयोगस्यास्पर्शनापत्तिरितिवाच्यंास्पर्शास्पर्शनंप्रतिस्पर्शेना
पिहेतुताकल्पनेनस्पार्शनाध्यक्षस्यामग्राह्यत्वेग्राह्यत्वेवाजननीयेस्पार्शनत्वाविधप्रतिबं
धकाभावयोरन्यतरस्यसहकारित्वोपगमात्नचप्रतिबध्यतावच्छेदकोटौस्पर्शा
र्शाध्यक्षनिवेशेनस्पर्शत्वेनहेतुत्वकल्पनेनैवचवायोःप्रत्यक्षत्वानंगीकारेणगोत्वा
दीयुप्रत्यक्षत्वस्वीकारएवोचितइतिवाच्यंवायुप्रत्यक्षत्वानंगीकारेप्रकारांतरेणला
घवसंभवात्तथाहि।परमाण्वादिघटितसन्निकर्षबलात्द्रव्यत्वस्पार्शनवारणा

यद्द्रव्यसमवेतस्यागुणेनप्रतिबन्धकेनसंयुक्तस्यागुणवत्समवायेनहेतुत्वंवाव्यात्तत्रचतुर
तुरणुकस्यागुणेव्यभिचारवारणायद्द्रव्याश्रयद्रव्यसमवेतस्यागुणत्वंकार्यतावच्छेदक
च मुपेयंतस्यैवसद्विनद्रव्यसमवेतस्यागुणत्वस्यकार्यतावच्छेदकत्वमादायविनिगमना
विरहःवायोरप्रत्यक्षत्वेतुवायुस्पर्शस्यागुणेव्यभिचारेणद्रव्याश्रयद्रव्यसमवेतस्पा
र्शगुणत्वस्यकार्यतावच्छेदकत्वासंभवेनसद्विभद्रव्यसमवेतस्पार्शगुणत्वस्यैवकार्यतावच्छे
दकतयाविनिगमनाविरहासंभवात्।नचैवमसन्निकृष्टगुणकर्मस्पार्शगुणा

पतितिर्यग्वा वाच्यं। एकाश्रयघटितसन्निकर्षेण द्वित्वादिप्रसङ्गवारणाय विजातीय
संयुक्तस्पार्शनप्रतिसामानाधिकरण्यसंबंधेन त्वक्संयोगाभावस्य प्रतिबंधकत्वा
वश्यकतयातेनैवासन्निकृष्टगुणकर्मस्पार्शनापत्तिवारणसंभवात्। नचैवं त्वक्संयु
क्तसमवायहेतुतावच्छेदकविनिगमनाविरहः।
वायुप्रत्यक्षतावादिमतेप्रसज्यतेतिवाच्यं। असन्निकृष्टद्रव्यत्वादिस्पार्शनवारणाय
त्वक्संयुक्तस्पार्शनत्वसमवायेनसद्द्रव्यसमवेतस्पार्शनत्वावच्छिन्नं

प्रतिहेतुतात्तत्र चद्रव्यासद्रव्यसमवेतस्पार्शनत्वमादायविनिगमनाविरहः।यो
योरप्रत्यक्षत्वेनवायुस्पर्शस्पार्शनेऽभिचारात्वायुप्रत्यक्षत्वंवादिमतेतुद्रव्या
सद्रव्यसमवेतस्पार्शनत्वमादायविनिगमनाविरहेणानेतपुरुषभेदसिध्यानं
तत्सन्निकर्षहेतुत्वकल्पनापतेर्वीयोरप्रत्यक्षत्वं स्वीकारएवोचितः।ए
तन्मतेऽक्तरूपेणस्पर्शोद्भूतत्वनिवेशेनस्पर्शत्वेनहेतुत्वकल्पनेनचकिंपक्षौ
रवसंभवेऽपिपुरुषभेदसिद्धिसन्निकर्षहेतुत्वकल्पनापेक्षयालाघवानपा

यादितिसिद्धांतानुयायीपंथाः॥नव्यास्तुअसन्निकृष्टद्रव्यस्पर्शीनवारणाय
पुरुषभेदभिन्नसन्निकर्षहेतुत्वंनोपपद्यते॥अपितुसद्भिन्नद्रव्यसमवेतस्पर्शीनं
प्रतिस्ववृत्तिप्रागभावप्रतियोगित्वविशिष्टंयद्स्ववृत्तिस्पर्शीनंविषयतासंबं
धेनतद्द्रव्यत्वसमवेतत्वसंबंधेनकृतित्वेनैवकारणत्वं॥स्ववृत्तित्वंचकालिकसं
बंधेन॥एवंचयापुप्रप्रसक्तस्वीकारेपुरुषभेदभिन्नसन्निकर्षस्यैवहेतुतायां
तत्कार्यतावच्छेदकेउपदर्शितगौरवस्यानवकाशात्तहेतुत्वस्यैवाकल्पनात्॥नच

वृत्तिकार्यतावच्छेदके द्रव्यान्यद्रव्यसमवेतस्पार्शीनत्वमादायविनिगमनाविरह
इतिचाच्यं।भवन्मतेस्पर्शीयत्वनिवेशेनस्पर्शीत्वेनहेतुत्वकल्पनेनचगौरवस्प
स्फटत्वात्।वस्तुतस्तुव्यापकधर्मेणकारणतेवकार्यतायाअपकल्पनात्।द्रव्या
द्यद्रव्यसमवेतस्पार्शीनत्वेकार्यतावच्छेदकत्वासंभवात्।सद्भिन्नस्पार्शीनत्वस्पे
क्वापुप्रसक्तताचादिमतेपिसन्निकर्षेकार्यतावच्छेदकत्वादित्याहुः।।वस्तुतस्तु गु
रुत्वाद्यतीन्द्रियप्रत्यक्षवारणायतेषांनतद्व्यक्तित्वेनप्रतिबंधकत्वेगौरवात्।ला

७३ धवेनविषयत्वेनैवलौकिकप्रत्यक्षहेतुत्वंविषयत्वंचलौकिकविषयतयासाक्षा
त्कारत्वमेवातथाचतेनैवगगनघटसंयोगस्पार्शनवारणेनतद्नुरोधेनुविजा
तीयस्पर्शस्पार्शनंप्रतिस्पार्शनाभावस्यप्रतिबंधकत्वमितिनवायुस्पर्शस्पार्श
नानुपपत्तिः।नचैवंविषयत्वाभावादेवनीरूपप्रत्यक्षवारणेरूपहेतुत्वम नावश्य
कमितिवाच्यं।घटादेःपाकादिनानीरूपतादशायांलौकिकप्रत्यक्षापत्तेः।रूपहेतुत्वाव
श्यकत्वादिसलमनल्पजल्पनेन।समवायस्यातींद्रियत्वमवादि मतंतुदूषयितुंतन्म

नमुपलभ्यस्यतिवैशिषिकाखिति। नप्रसक्ष्यः नलौकिकस्साक्षात्कारविषयः।संबंधप्रसक्ष
इति।संबंधस्यसमवायसाधारणत्वादिति भावः।नचैतावता दृश्याकार्यकारणभावे
मानाभावइतिवत आह।कथमन्यथेति॥अन्यथातादृशाकार्यकारणभावाकल्पने।
नप्रसक्ष्यइतिवा।चक्षुःसंयुक्तसमवायरूपकारणसत्वेनद्रव्यसमवेतचाक्षुषापत्ते
रितिभावः।नचेतिनह्यर्थः।तथाहेतुतायामिति।संबंधप्रसक्षेयावदाश्रयप्रसक्ष
त्वेहेतुतायामित्यर्थः।घटाकाशसंयोगप्रसक्त्यापत्तिरेवमानमित्याशंक्यनिराचष्टे।

७१ नचेत्यादि। योग्येति। द्रव्यत्वादि जाते र्योग्य मात्रसमवेतत्वाभावेन योग्यत्वं नस्यादत
तो गुणस्येति। योग्यत्वादिति। घटाकाशसंयोगस्य चायोग्याकाशवृत्तिवृत्तित्वेनायो
स्पर्शा ग्यत्वादिति भावः। नन्वेवं वायुस्पर्शेद्रव्यस्य च प्रत्यक्षंन स्यात्। तत्र योग्य वृत्तित्वादि
ति तत्राहुः किंचेति। तेजोघवात्। संयुक्तसंबंधप्रत्यक्षत्वापेक्षयातेजोघवात्। तेजसेवात्
संबंधत्वेहीति। संयोगत्वस्य जातिरूपतयातेजसेवेतिभावः। घ्राणग्राह्यगुणमा
त्र। घ्राणग्राह्य इति। तत्तेगंधगतेसामान्यगंधत्वादितयोगेगंधत्वयोः अतएव
ध

महत्त्वस्यामानाधिकरण्यविशेषणादेव।उद्भूतत्वविशेषणव्यावृत्तिमाहाननेति।रसनयो
ग्यगुणमाहारसनेति।श्रवणयोग्यमाहश्रवणेति।ननुचक्षुरादीनांद्रव्यमाहकत्वेनि
मीलितनयनस्यापितद्ग्रहापत्तिरतआहातस्यचेति।सन्निकृष्टंग्राहकत्वात्।उपस्थि थी
न्निवृष्टार्थग्राहकत्वादितियावत्।।सहकारिणःप्रसक्तेजननीयेऽपेक्षणीयाः।।तथाचेन्द्रियसे
योगादेरपिप्रत्यक्षेहेतुतयाननिमीलितनयनस्यप्रत्यक्षापत्तिरितिभावः।।ननुइंद्रियत्व
स्यतेजस्त्वादिनासंकराज्ञातित्वासंभवेनकथंद्रव्यलौकिकप्रत्यक्षत्वावच्छिन्नंप्रतिइंद्रियत
संयोगयोर्हेतुत्वमितिचेन्न।।इंद्रियनिष्ठैकत्वेषुवैजात्यंस्वीकृत्यविजातीयैकत्वेनैवतद्धेतुत्व

७५ त्वानचचक्षुःसंयोगदशायांस्पार्शनवारणायत्वक्संयोगदशायांचाक्षुषवारणाय
चक्षुस्त्वक्संयोगयोश्चाक्षुषस्पार्शनहेतुत्वावश्यकतयाइंद्रियसंयोगादेःप्रत्यक्षसामा
न्यहेतुत्वेमानाभावइतिवाच्यं।प्रत्यक्षसामान्यानुत्पादेचक्षुःसंयोगाभावत्वक्संयोगाभावादीनांप्र
योजकत्वेगौरवात् लाघवेनेंद्रियसंयोगाभावस्यैवप्रयोजकत्वेनेंद्रियसंयोगहेतुत्वावश्यकत्वात् अकार
णविरहस्यकार्यविरहाप्रयोजकत्वात् इंद्रियसंयोगस्यसंयोगेनेंद्रियस्यवाहेतुत्वमितिविनिगमनाविरहादि
द्रियत्वेनापिनद्वेतुत्वमिति ननुसर्वेषामेवसन्निकर्षाणांद्रव्यादिग्राहकत्वेआत्मनःप्रत्यक्षानुपपत्तिः तत्रस
युक्तसमवायाभावात् एवंरूपादेरपि[त] तत्रसंयोगाभावादिति अनःप्रत्येकमेवद्रव्यादिग्राहकतावाच्या तत्र

केन किं गृह्यत इति पृच्छति। अथ केनेति। उत्तरयति। द्रव्यमिति। संयुक्तसमवायस्य गुणमा
त्रग्राहकत्वे शब्दग्रहो न स्यात्। स्वस्मिन् स्ववृत्तियौगिकसंयोगाभावेन श्रोत्रसंयुक्त
समवायस्य शब्देऽसत्त्वादित्यत आह। शब्देतरेति। जातिः द्रव्यत्वादिः। संयुक्तसमवेतस
मवायस्य शब्देऽसत्त्वात्। शब्दत्वग्रहानुपपत्तेः। शब्देतरगुणेति। शब्देतरेति गुणविशे
षणं। तत्र। समवाये अभावे च। तथा च पंचविधसन्निकर्षाभावेन विशेषणतयैव तद्ग्रह इति
भावः। तस्य शब्दाभावस्य सर्थेः। ननु इंद्रियसन्निकृष्टविशेषणता इंद्रियसंयुक्तवि
अगे च तस्य घटाभावस्य सर्थः।

शोषणता तथा चरूपा दौरसत्वा भाव[illegible] महानुपपत्तिरत आह इंद्रियसन्निकृष्टेति। ब
हिरिंद्रियसंयुक्तविशेषणता इंद्रियसंयुक्तसमवेतविशेषणतेत्यादिरी
त्या बोध्या इंद्रियसंयुक्तविशेषणतया रूपादौरसत्वाभावग्रहसंभवाद्भानुपपत्ति
रिति भावः। हुत्वास्पर्शसमवायादिभेदेन बहुविधत्वान्ननु रूपादिमहाधर्मा
णामपुनर्वसुसंयुक्तसमवायप्रत्यासत्तेर्वा घटादिमहोपपत्तेरलं संयोगस्वरूपप्रत्या
सत्तिखेनेत्याशंक्येतिनिष्प्रतिनप्रत्यासत्तिः। नहि अग्राहकप्रत्यासत्तिःमाना

रवारणायद्रव्यान्यसंचक्षुषत्वस्यविजातीयचाक्षुषत्वस्यवातज्ञान्यतावच्छेदक
त्वमुपेयंएवंचतृटिचाक्षुषस्यासंगृहीततयाचक्षुःसंयोगस्यहेतुताव्यावर्त्तयितुं
दृयंसंयोगप्रत्यासत्तेरितिपरमाणौमहत्त्वनास्तीतिप्रत्यासत्तेरिवघटेआलो
कोनास्तीतिप्रत्यासत्याचक्षुःसंयोगावच्छेदकत्वात्चक्षुःसंबंधविशेषणतायास्वभावग
हकत्वादितिभावः।महद्भूतेति।महत्त्वविशिष्टोद्भूतरूपविशिष्टालोकनिरूपितसं
योगःद्रव्यचाक्षुषप्रत्यक्षेकारणमित्यर्थः।सइति।महद्भूतरूपालोकासंयोगइ

७८ स्यर्थः। नन्वेवमिति। एवमालोकप्रतियोगिकसंयोगस्य हेतुत्वे तेजःसंयोगाभावा
तेजःप्रतियोगिकसंयोगाभावात्स्व स्मिन् स्वप्रतियोगिकसंयोगानभ्युपग
मादिति भावः। तत्प्रभा। दीपप्रभा दीपप्रभायां दीपसंयोगस्यैवसत्त्वात्। अत्तोम
णिप्रभादाविति। मणेः पार्थिवत्वेनतत्संयोगस्याहेतुत्वादिति भावः। ननुमणिप्र
भादौसौरालोकसंयोगस्यैवसत्त्वादतआह। दृश्यतेचेति। महांधकाररूपेणसौ
रालोकमवच्छेदः। अंधकारेघटादिप्रत्यक्षापत्तिवारणाय तत्रालोकसंयोगस्य

हेतुत्वहेतुत्वभावश्चयंकोऽप्यालोकप्रसक्षेतुत्वेहेतुत्वेमानाभावः।अंधकारेपितत्प्र
सक्षोदयात्।अतःआलोकेऽपिभवद्यचाक्षुषत्वावच्छेदेनप्रत्येवहेतुत्वमतोनव्यभि
चारइत्याशंक्यतेऽथेति।सुवर्णेति।सुवर्णस्यालोकेऽभेत्वाभावेनतच्चा
क्षुषस्यालोकसंयोगकार्यतावच्छेदकानाक्रांतत्वादितिभावः।आलोकसं
योगइति।आलोकनिष्ठसंयोगहेतुरित्यर्थः।यत्रालोकवतिभूतलेघटआनीत
स्तत्रालोकप्रतियोगिकसंयोगाभावात्आलोकवृत्तिसंयोगस्यैवहेतुत्वादि

तिभावः। तस्य। आलोकसंयोगस्य द्विनिष्ठत्वात्। आलोकालोकभिन्नोभयवृत्ति
त्वात्। एवमुक्तरीत्या आलोकसंयोगस्यालोकेपिसत्त्वे। स्फवर्णीतिवा। तथाप्यालोका
काशसंयोगस्य त्वादितिभावः। अनभिभूतेति। अनभिभूतंरूपंयस्येतिबहु व्री
हौ। अनभिभूतरूपविशिष्टालोकसंयोगस्यहेतुतयास्फवर्णीतदसंभवइतिः।
स्फवर्णीरूपस्याभिभूतत्वात्। तथाहि। अचाक्षुषत्वावच्छिन्नंप्रति। अनभिभूतो
द्भूतरूपविशिष्टालोकसंयोगस्यहेतुत्वमितिभावः। अन्यथास्फवर्णीरूपस्याबधि

भूतत्वे। द्रव्यांतरेति। अंधकारे घटादौ स्फवर्णसंयोगात् घटग्रहापत्तेस्तिरं अभि
भूतत्वंतस्येतिभावः। बलवत्सजातीयम॰ हणकृतमग्रहणं चेच। अभिभवइति।
संप्रदायविदस्त्वित्यादि। आलोकेतरद्रव्यचाक्षुषे आलोकसंयोगस्यहेतुत्वेअंधकारेसु
वर्णसाक्षात्कारापत्तिरितिस्वयंभिन्नत्वमालोकेविशेषणं। तथाचस्फवर्णाभिन्नंयत्तेज
स्तद्भिन्नद्रव्यस्फवर्णघटादिचतत्स्यक्षेआलोकप्रतियोगिकसंयोगोहेतुःअतोनां
धकारेस्फवर्णादिचाक्षुषसाक्षात्कारइत्यखंडलार्थः। कारितानवछेदकगौरव
मेवाग्राःस्वरसः केचित्तुद्रव्यचाक्षुषेआलोकसंयोगस्यप्रभासंयोगत्वेनैवहेतुता

८ प्रभासंचस्पर्शवदिति। यद्यप्यभिसाङ्गस्पर्शवदिसंयोगव्याप्यत्वेनैवहेतुत्वमिसपिक्षेचित्। आलोकसंयोगानवच्छेदकावच्छेदेनचक्षुःसंयोगेघटादिमहापरिमाणेतत्रालोकसंयोगस्यचचक्षुःसंयोगस्यच परास्परानवच्छेदकावच्छेदेनैवसत्वादिसाङ्कंकतेतथापीतितथापिआलोकसंयोगादेर्हेतुत्वेपि। परस्यांपरदिगवच्छेदेनचक्षुःसंयोगवतइतिशेषः। यदवच्छेदेनेति। आलोकसंयोगावच्छेदकावच्छिन्नचक्षुःसंयोगत्वेनहेतुत्वादितिभावः। अथम्

२ परदिगवच्छेदेन। तदसंयुक्तेति। आलोकसंयुक्तेत्यर्थः। पुरुषेति।२

र्त्तयोः समानदेशतया विरोधात् द्वयदौरेकावच्छेदेन संयोगस्य संबंधेनालोकचक्षुषोः
असंभवाद्वा लोकसंयोगावच्छेदकावच्छिन्नचक्षुःसंयोगः कथमुत्पद्येत इति चेन्न।
निबिडयोरेव मूर्त्तयोः समानदेशतानंगीकारात्। आलोकचक्षुषोस्तेजस्त्वेन निबि
ड त्वाभावात्। नचैतदपि आलोकसंयोगस्यकारणतावच्छेदकक्रोडीप्रविष्टत्वात्न
कारणत्वमितिवाच्यं। तादृशो हि चक्षुःसंयोगस्त्वेन चक्षुःसंयोगावच्छेनालोकसंयोग
स्वेनवाहेतुत्वमितिविनिगमनाविरहेणतस्यापिकारणत्वात्। नचालोकसंयोगस्य

विनाप्रिछिठलादेःसांजनचोरादेश्चांधकारेप्रत्यक्षोद्यातकर्णस्यकारणत्वंद्वि
तीयाचांविजातीयचक्षुषःप्रत्येवालोकसंयोगस्यहेतुत्वाद्विडालादिसांजनपुरुषो
यचाक्षुषत्वंजनस्यचतंचेतद्वैजात्यमितिकेचित्।अंजनाभावविशिष्टालोकसंयोगा
भावत्वेनद्रव्यचाक्षुषंप्रत्येवप्रतिबंधकत्वंतदभावत्वेनचकारणता।अंजनाभा
वश्चस्वसंयुक्तचक्षुःसंयोगित्वसंबंधावच्छिन्नप्रतियोगिताकः।आलोकसंयोगाभा
वेअंजनाभाववैशिष्ट्यंचसामानाधिकरण्येन।।आलोकसंयोगाभावश्चस्वसमाना

वचनेत्या शंकते। स्यादेतदिति। स्मृत्वाया भावग्राके हेत्वे नैवत त्स्यास्मृतिर्न स्यात आह। स
मवायेति। प्रमाणसत्वेक धर्मयोरर्थ सं मतआह। नहीतिताथा च प्रमाणाभावस्य प्रमेयाभा
वयाप्यत्वात्तयोरस्त्वभितिभावः। ननु अयंघट इत्यादि प्रसक्तंघट घटत्वयोः संबंधवि
षयकंतत्र च समवायातिरिक्तसंयोगादीनांबाधात्समवायसिद्धिः तथा चेतरबाधस
हकृतप्रसक्तप्रमाणस्यैवसंभवात्। कथंप्रमाणाभावइत्याशंकते। अयंघटइत्यादि। न
तुसमवायातिरिक्तस्यैवकस्यचित्संबंधस्यसत्वान्नेतरबाधइत्यत आह। नहीतिनेषांघट
स्यचलनादीनामन्यःसंबंधःसंयोगादिः। सत्वादितिताथा चसमवायोतिरिक्तस्या

धारा धेयभावा स्वरूपसंबंधस्य मत्वात् । तद्विषयत्वेनैव प्रतीतेरुपपत्तेर्नतदर्थानु
पपत्या समवायसिद्धिरितिभावः । नन्वाधारतासमवायइतिपर्यायइतिसिद्धं समवायेने
त्यत आह । नहीति । पटादावपि सत्वात् । समवायस्य सत्वात् । तथाच समवायस्यैवाधार
त्वं पटादावपि समवायस्वरूपघटत्वाधारतासंबंधेनतत्रापि घटत्वविशिष्टबुध्यापत्तेः । स म
वायातिरिक्तोवाधारत्वात्मकस्तस्यात्तथाकिंसमवायेनेतिभावः । ननु घटे घटत्वसमवा
यभावादेव नतथाप्रतीत्यापत्तिरित्यत आह । एकएवेति । तत्सिद्धेरिति । तथाचसमवेत
मितिप्रतीतेः स्वरूपसंबंधविषयकत्वेनोपपादयितुमशक्यत्वात् । समवायस्वीकार

इतिभावः।वस्तुतस्तु। अयंघटइत्यादिप्रतीतीनामनंतस्वरूपसंबंधविषयकत्वेगौरवात्
लाघवेनातिरिक्तसमवायविषयत्वमितिबोध्यं।समवायेप्रमाणमुक्तोऽभावेतदाह।न
चेति।अस्मिन्निति।अप्रामाणिकइत्यर्थः।तस्मिन्हेतुः।अभावस्यसिद्धेः।ननुनवयमभावो
नास्तीतिब्रूमः। किंतुतस्यैतेअधिकरणात्वेनैवोपपद्यंइति अतिरिक्तत्वेमानाभावइतिप्रा
भाकरमतंदर्शयति।अत्रप्राभाकरइति।अतिरिक्तः।अधिकरणादतिरिक्तः।तद्रूपोयाभा
वस्यहायःप्रहासस्तीतिविशेषणतारूपप्रहासस्यंतरकल्पनेनेत्यर्थः।यद्यपिसमवायमहा
र्थमेवाभावंदूषयंतस्तंसामस्त्येरंगीकुर्वंतथापिभावग्राहकेनतत्वंसामस्त्यंयद्वैयायिकैरु

पेपतेतदेवखंड्यतइतिभावः। अभावइति। अभावाधिकरणतेसर्थः। यत्कालावच्छेदेन
पटाभावाधिकरणतोऽपेपतेतस्मैवतत्स्वरूपत्वमंगीकृतइतिभावः। नचाभेदेइ
ति। अभेदेऽभावाधिकरणयोरभेदे। तथाभावः। आधारक्षेपभावः। अनवस्था
पक्षेइति। घटाभावातिरिक्ताभाववत् घटाभावेऽपि अतिरिक्तः कल्प्यतेतथा
चानवस्थेसर्थः। ननुयद्धर्मविशिष्टेयद्धर्मावच्छिन्नभवत्तानप्रतीयते। तद्धर्मावच्छिन्नभवत्ता
रूपिताधिकरणतानोपेपतेएवं चभूतलेभूतलत्वावच्छिन्ननिरूपिताधिकरणत्वा
भावान्नभूतलेभूतलमितिप्रतीतापत्तिः। भूतलेघटाभावत्वावच्छिन्ननिरूपिताधि

करणतायाः स्वीकारात्च भूतले घटाभावप्रतीतिरूपपन्नैवेत्यसदाहाकिं चेति।
आद्येतदधिकरणस्य घटाभावस्वरूपत्वे इदानीमिसनंतरंइहेतिशेषः। अंत्येतदधि
करणस्य घटाभावास्वरूपत्वे अप्रसंदोषीति। घटेनीतेपीत्यर्थः। नन्वतिरिक्ताभा
ववादिमतेघटेआनीतेघटाभावोननश्यतिननवागच्छतितेस्यनित्यत्वात्अभा
वत्वाच्चेतिकुतोनुघटाभाववतीबुद्धिः। कथंवाभावाभावयोरेकाधिकरणवृत्ति
स्वरूपोविरोधः। तथैवोभयोःसत्वात्। अथघटानधिकरणकालावच्छिन्नभूतला
दिकमेवघटाभावस्यसंबंधः। तथाचघटवतिभूतलेतेनसंबंधेनघटाभावस्याधि

द्यमान त्वान घटाभाववत्ताबुद्धिः। घटाभावस्य तेन संबंधेना विद्यमानत्वा च्चनधि
रोधिता घटकसंबंधेन तदधिकरणवृत्ति चरूपविरोधिआ घातोपीति चेत्तर्हि वि
शिष्टसत्तायाः अनतिरेकेपि यथा विशिष्टनिरूपिता धिकरणतायाः गुणोऽअस
त्वात् गुणो गुणकर्मास्त्वविशिष्टसत्तावानितिनप्रसयः तथा घटवद्भूतलेपित
कालावछेदेन घटाभावाधिकरणतायाः अनंगीकारात् नतत्र घटाभावेवत्ताबुद्धि
प्रसंगइत्यस्वरसादाह। किंचेति। केचिद्यु ननुउत्पादविनाशशालिनी एकातिरिक्ता अधि
धिकरणतोपेयतेतस्याश्चेद्घटेआनीतेतन्नाशोपगमेनतद्वत्ताबुद्धि प्रसंगइत्यस्वरसमाहुः।

तदसत्। क्षतिक्षणमप्रामाणिकानंताधिकरणत्वप्रसंगेगौरवेणातिरिक्ताभा
वस्यैवकल्पयितुमुचितत्वात्। नचत्वदुक्तदोषइतिवाच्यं।मन्मतेघटाभावाधिकर
णतायांघटाधिकरणकालस्यावच्छेदकत्वानेष्युपगमेनानुपपत्तभावात्। सइ
ति।घटप्रागभावोघटध्वंसश्चेत्यर्थः।सर्वदेति।प्रागभावनाशकालेध्वंसानु
क्षणेचेत्यर्थः।कपालकालमात्रइत्यर्थइतिकश्चित्। अन्यथा प्रागभावध्वंसयोर्घटकालेसत्वे
पिप्रतीत्यस्वीकारे।कपालप्रतीतिरपिहि।कपालस्वरूपप्रागभावध्वंसयोरप्रतीतौकपाल
मपिकथंप्रतीयेत।नचयाणामेकेयेनरकस्याप्रतीतौनकस्यापिप्रतीतिःस्यात्।कस्यचित्प्रतीतौ

सर्वमेव प्रतीयेतेति भावः। अथो ह्येकपालस्य छेद्यर्थं इति कश्चित्। नन्वत्रापि घटकालावच्छेदेन घटप्रागभाव ध्वंसाधिकरणतायाअनभ्युपगमात्। नन्तत्रेतद्बुद्धिरित्यस्यरसादाह। किंच मोक्षइति। उत्पादविनाशशालिनीमधिकरणतामंगीकृत्य घटकाले घटप्रागभाधिकरणतायाः नाशात् ध्वंसाधिकरणतायाअनुपपत्तेश्चन तद्बुद्धिरित्यस्यरस्पार्शं चेति कश्चित्तत्तु पूर्वमेव दूषितत्वादनादेयं। अस्माध्यचेति। इष्टापत्तौच श्रवणाम
ननिदिध्यासनध्यानधारणासमाधिकृतमनेकविधंदुःखंकोपिनानभ्युपेया

दितिबोध्यं। ननु नित्यस्य स्वाभिन्नतेरेव मुक्तित्वेन नासाध्यता पतिरित्यस्य चेराहासंक्षे
पइतितैरीश्वरानंगीकारात्तईश्वरीयनित्यस्फरत्वमप्रसिद्धं। जीवस्यतुनित्यस्फरत्वेप्रमाणाभा
वेननित्यस्फरत्वाभिन्नमुक्तिरितिमुक्तिलक्षणंनसंभवतितस्मादुःखध्वंसरूपमु
क्तेरसाध्यतापतिरेवेतिभावः इदंतुचिंत्यंतन्मतेदुःखध्वंसनिरूपिताधिकरणतायाःसा
ध्यत्वंसंभवत्येवामोक्षाधिकरणतायाःसाध्यत्वोपगमादितिप्राभाकरमतेनेवदोषःव
स्तुतस्तुभूतलेघटोनास्तिपर्वतेघटोनास्तीत्यादिप्रतीतीनामनेताधिकरणभेदेनतत्तद्
धिकरणरूपाभावविषयकत्वकल्पनेगौरवात्तत्रैकातिरिक्तघटत्वावच्छिन्नप्रतियोगिता

काभावविषयकत्वमेवसमुचितं। एवं घटवत्ताबुद्धिप्रतिघटाभाववत्ताज्ञानत्वेनप्रतिबंधक
तावांस्तघटभूतलेपियोकिंचित्वेघटाभावसत्त्वात्घटाभावकूटवत्ताज्ञानत्वेनैवप्रति
बंधकत्वंवाच्यंतदपेक्षयाघटत्वावच्छिन्नप्रतियोगिताकाभाववत्ताज्ञानत्वेनप्रतिबंधक
त्वमेवोचितमित्यादिरीत्याऽतिरिक्तसामान्याभावसिद्धिरितिनिपुणतरमूहनीयं।तदभा
वइति। घटाभावाभावस्त्यप्यभावइत्यर्थः। केवलाधिकरणमित्यादि। केवलाधिकरणंघ
टाभावानधिकरणभूतंतदभावः। घटाभावाभावः। सर्वत्रघटाभावस्थलेपि। सएवा
धिकरणस्वरूपएवा। ननुसर्वत्राधिकरणस्वरूपत्वेपूर्वदूषणंदत्तमेवेत्यतआह।

भवदुक्तेति।स्वं।घटा भावाभावस्याधिकरणस्वरूपत्वेतथाचयानिदूषणानि अधिकरणस्वरूपत्वे चयोक्तानितानि चन्मतेप्यविशिष्टानीतिभावः।तस्यचेघटस्यचेत्युक्तयुक्तेरिति।आधाराधेयभावानुपपत्तिरूपदूषणादिसर्वैः।संप्रदायमतेदूषणंदत्त्वेवनव्यमतमाह।नष्वास्खलितिअप्रमाणत्वेनप्रत्येयः।बाधकाभावात्।प्रमात्वेबाधकाभावात्॥ अथोन्याभावस्यछलेशंकतेस्यादेतदितिअंशेभूतले।अघटभेदभिन्नाभावेआधेयघटभेदभिन्नत्वे।तद्वैदोपि।घटभेदभेदस्यभेदोपीत्यर्थः।भवदुक्तेति।आधाराधेयभावानुपपत्तिरूपदूषणप्रसंगादिसर्वैः।प्रामाणिकत्वादिति।बीजांकुरानवस्थाया

इत्यप्रमाणसिद्धत्वादित्यर्थः संक्षेपइति घटभेदाभावोघटत्वस्वरूपइत्यादिबोध्यं स चायमिति आगुक्तयुक्त्यातिरिक्तश्चेन्नसिद्धोभावइत्यर्थः तत्रप्रथमोदृष्टमन्योन्याभावंलक्षयतितत्रेति प्रतीतिसाक्षिकइति ईदृशाप्रतीतिसिद्धमखंडोपाधिरूपमन्योन्याभावत्वमेवान्योन्याभावलक्षणमित्यर्थः प्राचीनास्तुतन्मतेऽन्योन्याभावलक्षणंदर्शयति यदिदमाहुरित्यादिना तादात्म्येति घटतादात्म्यंहिघटत्वंतथाचघटान्योन्याभावबोधेघटत्वसंबंधविधयाप्रकारतयाचप्रतियोगिताव च्छेदकमितिद्विविधतयाघटत्वस्यभानंतद्वच्छेदेनप्रतियोगिताकश्चान्योन्याभावइतिलक्षणसमन्वयः नचसंयोगितादात्म्यंसंयोगएवेतिसंयोगसंबंधावच्छिन्नप्रतियो

नघटत्ववत्ताज्ञानंप्रतिघटान्योन्याभाववत्ताज्ञानत्वेनैवप्रतिबंधकतयाचान्योन्याभावस्य
तथानावश्यकत्वादित्यखंडनोपाधिरूपत्वमेवतस्यसम्यगित्यस्यपरेआहुरित्यनेनसूचितः
तदन्यइतिअन्योन्याभावपिभइत्यर्थःतथाचान्योन्याभावभिन्नाभावत्वंसंसर्गाभावत्व
मिनिनलक्षणमितिभावःअत्रयद्यपिनास्तीतिप्रतीतिसाक्षिकोभावःसंसर्गाभावःतदन्योन्याभा न्या
वस्त्यपिवस्तुसंचिंतनंतथापिनास्तीतिप्रतीतेरत्यंताभावत्वविषयकत्वेनोपपत्तेरितिरिक्तसंस
र्गाभावत्वेमानाभावानतथोक्तंसोपिसंसर्गाभावोपिअत्रनास्तीत्यनुभवेसादिरग्रेचविनष्ट इ
तिआदिप्रतीतिःदृश्यतेअसंताभावध्वंसयोःप्रमाणप्रदर्शनायानुलक्ष्योपपत्तिभवेदि

इतिचोध्यं निश्चत्वमात्रोक्तौगगनादौसंसर्गीभावत्वमात्रोक्तोचध्वंसप्रागभावयोरतिव्याप्तिरित्यसमवा
दानं॥नित्यत्वेचात्रप्रागभावाप्रतियोगित्वेसतिध्वंसाप्रतियोगित्वं ध्वंसस्यप्रागभावाप्रतियोगित्वात्
प्रागभावस्यचध्वंसप्रतियोगित्वान्नतत्रातिप्रसंगःएकतरमात्रोक्तोचान्यतरत्रातिव्याप्तिरितिध्येयं॥
उत्पत्तिमानितिउत्पत्तिमात्रोक्तोघटादौध्वंसभावमात्रोक्तोचात्यंताभावादावतिव्याप्तिवारणायउभ
योपादानं आधेयक्षणसंबंधउत्पत्तिः स्वाधिकरणक्षणावृत्तिप्रागभावप्रतियोगिक्षणसंबंधः॥उत्पत्तिरि
तियावत्॥अध्वंसस्यायोगस्यक्षणयोगोजन्मनाइतिवानदर्थः॥स्वाधिकरणक्षणध्वंसान
धिकरणक्षणसंबंधवोपत्तिरिति॥सर्वं[illegible]महाप्रलयागीकर्तृमतेतुकचिदपियदा
पसमयसंबंधेपत्समयवृत्तिध्वंसप्रतियोगित्वंनास्तितस्यतत्संबंधउक्तिरितिनदर्थः॥

स्ववृत्तिभिन्नपदार्थप्रागभावानधिकरत्वं स्ववृत्तिध्वंसप्रतियोग्यनधिकरणत्वं वा क्षणत्वमिति बोध्यं सर्वध्वंसश्च।
ननु घटतीतिरूपमानमनत्राह नहीति ध्वंस्यैसेध्वंसाप्रतियोगित्वनुप्रागभावाप्रतियोगित्वमपि स्यादिति अ
मनिरा कर्तुमाह नह्यप्रागभावश्चेति। ध्वंसप्रागभावश्चेत्यर्थः अगेवप्रतियोग्यवतदनग्राह्यलक्ष
त्वतीतिप्रमाणयति। उभयत्रेति प्रतियोगिदशायांप्रतियोगिप्रागभावदशायांचेत्यर्थः उदमुपलक्षणं
ध्वंसप्रागभावानधिकरणकालस्यप्रतियोग्यधिकरणनिरूपेनध्वंसस्यध्वंसांगीकारेघटोन्म
ज्जनप्रसंगात्। ध्वंसस्यनध्वंस्यः। एवघटप्रागभावकालेध्वंसोन्मज्जनप्रसंगात्। घटप्रागभा
वस्यघटध्वंसरूपतेत्यर्थः। पिदृष्टव्यं। प्रागभावेलक्ष्यतिविनाशीति। घटादावत्यंताभावा
द्यतिव्याप्तिवारणायथाक्रमंविशेषणद्वयोपादानं। ननुप्रागवांगीकारेमानाभावःसतआ

न०प०शि ता सत्वेति। तथाचभविष्यतीतिप्रतीतिविषयथाप्रागभावश्चावश्यकइतिभावः ननुभविष्यत्स्ववर्तमानप्रागभाव
९० प्रतियोगित्वेरूपत्वेप्रागभावसिद्धिः तदेवनकिंतुवर्तमानकोलोनरकालोत्पत्तिकत्वेसेवत्तत्वंनचयत्सामग्र्यव्यवधि
हितानन्तरोयःक्षणःसतदुत्पत्तिमानितिसामग्रीव्याप्यंयद्यदिद्वितीयक्षणेघटादेरुत्पत्तिवारणायप्रागभावहेतुत्वमा
वश्यकमितिवाच्यं उत्पत्तभविनसामग्रीव्याप्तेरनुपगमात् अपितुतदाधिकरणत्वेनसामग्रीव्याप्तेव अस्तुवातथा
तथापिजन्यद्रव्यत्वावच्छिन्नप्रतिसमवायिनद्रव्यत्वेनप्रतिबंधकत्वोपगमेनानुपपत्तेरभावात् अनंतप्रागभाव
वा मौदिककल्पनामपेक्ष्यैकप्रतिपन्नप्रतिबंधकभावकल्पनायाएवन्याय्यत्वादितिचेदत्राहुः सहस्वनंतुकपटस्थले
स्वानधिकरणतत्तादोषोत्पत्तिनिवारणायतावत्संयोगानांनानात्वंतुनोवातानवच्छिन्नत्वंकिंत्वेतत्कारणत्वमपेक्ष्यैकप्राग
भावकारणत्वमवश्यमुचितंप्रागभावस्यचप्रतियोगिसमानदेशतानियमेनघटादीनांदेशनियमोपपत्तिः
नचविचतुरेषुउत्पन्नेषुसंयुक्तेषुचनंतुषुनष्टेषुत्पत्तिनिवारणायतत्तत्संतूनांतत्तत्संयोगानांवाऽहेतुत्वमाव

वोन्मज्जनप्रसंगोपि इत्यर्थः॥ नित्यत्वेति नित्यत्वं चात्रात्यन्ताभावाप्रतियोगित्वेसतिध्वंसाप्रतियोगित्वं ग्राह्यं अत
एवध्वंसप्रागभावयोर्विभागस्तिभावः प्रसंगात्व्याप्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावसतिरूपसाध्यिनुपपत्तौ णा
मारभते नित्यश्चेत्यादिना एकतरेऽपीति एकमात्रपर्याप्तिकइत्यर्थः अन्यश्चेति एकमात्रापर्याप्तवृत्तिधर्मावच्छिन्नप्रति
योगिताकश्चेत्यर्थः नचैवं एकमात्रापर्याप्तवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावे घटवतीत्यादिप्रतीतिर्हयग्रहप्रती
नमस्यंताभावान्योन्याभावभेदेन घटवतीतिव्यासज्यवृत्तिधर्मावच्छिन्नाभावानभ्युपगमेनताहशप्रतीत्यनुपपत्तिरि
तिभावः॥ नचैवंताहशप्रतीतेःपक्षाभावविषयकत्वेनैवोपपत्तेः॥ नातिरिक्ताभावविषयकत्वमिति
वाच्यं तथासतिकश्चित्*इष्टाभावः कश्चित्सिद्धाभावोविषयइतिताहशानुगतप्रतीत्यनुपपत्तेः॥
अनुगतधर्मंविनाअनुगतधर्मप्रतीत्यभावात्॥ ननु आयोतुद्विस्वावच्छिन्नप्रतियोगिताका
भावः॥ तथापिकृतानामेवद्विस्वसमानाधिकरणघटत्वपटत्वाद्यवच्छिन्नप्रतियोगिता

काभावानांप्रतियोगितावच्छेदकंतदुपेयतेतथाचतस्यातिरिक्तस्यमानाभावएवेसतआह।
एकघटवतीतिघटोनास्तइतिप्रतीतेःयदिघटप्रतियोगिताकाभावोविषयःतर्हिघटद्वयवस
पियम्किंचित्घटप्रतियोगिताकाभावस्यात्तादृशप्रतीत्यापत्तिःयदिचेघटत्वाव
च्छिन्नाभावोविषयःतदाएकघटवत्यपिघटोनास्तइतिप्रतीत्यनुपपत्तिरित्यनायसा
तिरिक्तोभावोऽभ्युपेयतइतिभावःननुघटद्वयवत्यपितद्भिन्नघटत्वावच्छिन्नाभावःघटां
तरवर्तिचतस्यघटत्वावच्छिन्नाभावोविषयोवक्तुंशक्यतएवेतिचेन्नातथाप्यनुगतध
र्मेविनाऽनुगतप्रतीतेरुपपादयितुमशक्यत्वमित्यादेःप्रागेवनिवेदितत्वात्।ननुयत्किंचि

इ यवति घटपटौ नस्त इति प्रतीतेर्द्वित्वस्यामानं नप्रतियोगिता वच्छेदकांतर्भावि धयक्तं चिद्
येसत्वेनतद्ववच्छिन्नाभावासंभवात्। नापिद्वित्वविरोधः। नतद्वित्वेत्वेनानुपस्थितेः। केवलं
घटादिमत्पितृत्वादिप्रयत्नेनप्रत्येकं घटत्वपटत्वादिकमपिनतथेतित्वन्मतेपिअनुगत
प्रत्ययोनुपपन्नवेतिचेन्। द्वित्वेद्वित्वधूमितावच्छेदकीभूतंघटत्वंपटत्वेचनथाप्रति
योगितावच्छेदकतावच्छेद्यत्वेतीत्याद्या। प्रतियोगितावच्छेदकावच्छिन्नेघटपटोभय
मितिनानुपपत्तिरेवेतीत्यपीतिध्येयंतत्रोरितिप्रतियोग्यभावयोरेकाधिकरणा
वृत्तिस्वरूपविरोधादित्यर्थः। ननुवैकस्मिन्नपिसमवायेनद्वित्वमस्तीत्येवंतत्राह। एकोन
द्वावितिएकस्मिन्नसमवायेनद्वित्वसत्वेनएकोद्वावितिप्रतीतापत्तिरतःसमवायेनत

त्वेपिपर्याप्तिसंबंधेनदेतैसत्त्वात्तथाप्रतीतिरितिरूपेयंएवंचप्रतियोगितावच्छेदकप
र्याप्तिकरणेनैवाभावस्यविरोधान्नतदनुपपत्तिरितिभावः प्रतियोगितावच्छेदकावच्छिन्नेनैवाभावस्यवि
रोधात् प्रतियोगिमात्रेणनातिरिक्तविशिष्टाभावोविरुध्यतेत्याह एवमपिप्रतियोगितावच्छेदकावच्छि
न्नेनैवाभावस्यविरोधादेवेयर्थः इयंदंडीपुरुषोनास्तीतिधीः तस्यपुरुषस्यानचकंचि
द्दंडाभावःकंचिन्नपुरुषाभावोविषयइतिवाच्यंविषयानुगमंविनाऽनुगतप्रती
त्यनुपपत्तिरित्यस्यासकृदवेदितत्वात्नन्वेवंयातूपदर्शितरीत्याऽतिरिक्तोऽभावस्तथापित
र्हिकानविशेषताप्रसक्तिः किंतु चक्षुरादि नाबाध्यादिज्ञानासंभवाद्ध्यानुमाना
दिःप्रमाणांतरंवक्तव्यंतेतथाभावग्रहेकृतानासंयोगादिसंनिकर्षाणामभावेनेंद्रिया

ग्रहकत्वासंभवात्। प्राप्तस्येंद्रियस्य ग्राहकत्वात्। अन्यथा निमीलितनयनस्यापि घटादिग्रहोपत्तिरिति नोपलब्ध्यात्मकं प्रमाणांतरं अभावग्राहकं मंतव्यं। न च विशेषणतैव संनिकर्षः। तस्याः तत्रैव ग्राहकत्वात्। समवायानंगीकारे समवायग्राहकत्वेनापि ग्राहकत्वात्। तथा च घटाभावस्यानुपलब्धिरूपप्रमाणजन्यमनुपलब्ध्यैव ज्ञानं नतु साक्षात्कारः। साक्षात्कारस्येंद्रियजन्यत्वेन प्रसिद्धत्वात्। न चैवं निमीलितनयनस्य घटाभावग्रहोपत्तिः। स्पर्शनेंद्रियाभावो भांनिरूप्यते। इतिनियमात्। अभावग्रहेऽधिकरणप्रत्यक्षस्य जनकतयातज्जनना र्थमिंद्रियापेक्षणात्। अतएवत

उक्तयाव्यधायिद्वैमिद्रियंनाभावग्रहेहेतुः। न चाधिकरणप्रत्यक्षस्यव्यापारतया
नतेनतस्यथासिद्धिः।व्यापारेणव्याप्तिग्राह्यथोपिध्वस्संभवात्।अन्यथा चक्षुःसंनि
कर्षेण चक्षुषोग्रहथासिद्धिःप्रसज्यतेतिवा। यो।इंद्रियस्यजनकत्वसंभवेऽधिकरणप्रत्य
क्षस्यतथ्य व्यापारत्वातदेवनाकृतस्यभिकर्षीभावात्। एवं चानुपलब्धेः प्रमाणस्या
पिसत्वाच्च स्वार्थैवप्रमाणा॰ नीयपिअसंगतमितिनिषेधभृंभट्टमतंदूषयतिषियंतु
तन्मतमुपन्यस्यति।भट्टाप्तिस्यादिना।नेंद्रियग्राह्यः।नेंद्रियजन्यलौकिकसाक्षात्कारवि
क

षयः।कृ।प्र।संनिकर्षाणां।संयोगादि।पे चानामभावात्।अभावेऽप्रसंभवात्।न व्यभाव
९४ ग्रहानु पपत्तिरत आह।किंचिदिंद्रियसंबद्धविशेषणतासन्निकर्षेति
न।नेंद्रियसंबद्धविशेषणतासन्निकर्षइतिभावः।प्रमाणांतरेति।धर्मिकल्पना
तोधर्मिकल्पनायाःलघीयस्त्वात्।मितित्वायात्।अनुपलब्धेःकृ।प्र।विजातीयप्र
मांप्रतिकरणत्वकल्पनमपेक्ष्यकृ।प्र।प्रमाहेतुतयाविशेषणतारूपसंनिक
र्षकल्पनमेवलघीयस्त्वमित्यर्थः।तथाचेंद्रियेणैवतद्ग्रह इतिभावः।अन्यथेति।संनि
कर्षकल्पनयोपपत्तावपि प्रमाणांतरकल्पनेइत्यर्थः।अन्यथासन्निकर्षांतराकल्पनेइ

सर्थइ सपिकश्चित् कृपानां संयोगादि त्र याणांसन्निकर्षाणां ईकते तत्रेति प्र
सक्षएवे प्रसक्षविषयएव अयंशब्दः तथाचजन्यसाक्षात्कारत्वावछि नंप्रतिसंनि
कर्षत्वेनहेतुतयाशब्देपिसन्निकर्षकल्पनमावश्यकं सन्निकर्षत्वंचसंयोगाद्यन्य
तमत्वमितिभावः अध्यक्षएवेसनंतरमभावइतिशेषः तथाचात्रापभावग्रहार्थं
सन्निकर्षापेक्षणमावश्यकमितिभावः ननुशब्देपिप्रमाणांतरापेक्षेसयुक्तो
प्रतिबंदेरनुमरत्वादिसस्वरसादाह किंचेति ननुआप्तारामावेपिफलायोगस्य

वछि न्नकारणस्वरूपकरणत्वमुपपद्यतएव। अतएवसाधकतमंकरणमितिसूत्र
मपीसंतआहुर्व्यापारवदिति। निमीलितनयनदृशोयोंऽधकारेचचक्षुषोपिफ
लायोगात्स्वेतरयावत्कारणसमवधानेयदव्यवहितोत्तरक्षणेकार्योत्पत्तिःतत्स
वफलायोगव्यवछिन्नंवाचं। एतस्यचयावत्कारणघटिततयागुरुत्वेनव्यापारवत्का
रणत्वस्यैवकरणत्वौचितेयेनानुपलब्धेःप्रमाकरणत्वव्याघातइतिभावः॥ ङ। उ कमि
ति। उ कंप्रायमित्यर्थः। वस्तुतस्तुधीकल्पनान्यायेनैवसन्निकर्षकल्पनेननुप्रमाणां
तरकल्पनमितिपूर्वोक्तयुक्तिरितिरमणीयेतिहृदयं॥ अनुपलब्ध्याख्यप्रमाणांतरा

नंगीकारे घटाभावेवेतिघटभ्रमदशायांघटाभावस्यचक्षुरादिंद्रियसंबद्धविशेषणतया
घटाभावप्रत्यक्षापत्तिःमन्मतेचघटोपलंभसमयेघटानुपलब्धेरभावान्नतत्प्रत्यया
पत्तिरित्यनायत्तप्रमाणांतरकल्पनमावश्यकमित्याशायेनमीमांसकःशंकते।नचैव
मिति।एवमनुपलब्ध्याख्यप्रमाणमनंगीकृत्येंद्रियसंबद्धविशेषणतायाःअतिरि
क्तायाःप्रत्यासत्तेरयोग्यानुपलब्धेरपीत्तिचक्षुर्घटाभावप्रत्यक्षेजननीयेभवताअ ष
तिरिक्तप्रमाणत्वेनाभ्युपगतायाःयोग्यानुपलब्धेःसहकारिसंकल्पेतेघटाभाव
तिचघटोपलंभेनयोग्यानुपलब्धेरभावादेवनघटाभावप्रत्यक्षापत्तिरितिभावः।

ननवेवं किमवशिष्टमनुपलब्धेः प्रमाणत्वेन प्रसुतइंद्रियस्य करणत्वेविशेषणतारू
पप्रयासस्यिकल्पनमधिकमिति चेन्न। विजातीयप्रमाकल्पनापेक्षयाप्रयाससंत
रकल्पनायाः ह्याय्यत्वाद्व्याघातत्वाभावेन प्रमाणत्वासेभवस्य पूर्वमेवदर्शित
त्वाच्चेति। अभावग्रहे॥ अभावलौकिकप्रत्यक्षे। अथकेयमितिइयंअभावग्र
हे हेतुः योग्यस्यानुपलब्धिरितिवायोग्यानुपलब्धिश्चाद्धार्थ*इत्यर्थः। अत्रा
द्यमाशंकते। योग्यस्येति। जलपरमाणाविति। महत्वाभावप्रसक्तानुरोधेन
विजातीयचक्षुःसंयुक्तविशेषणतायाः अवश्यमेंगीकार्यतयापृथिवीत्वाभावस्या

पिग्रहापत्तिरिति भावः। दूषणान्तरमाह। स्तंभेति। द्वितीयमाशंक्य निरा चष्टे। अथ
योग्यइति। स्वेकदेशमनेदूषयितुमनुपलभ्यस्यति यच्चिति। वायाचिति। वायोर
योग्यत्वादिति भावः। परमाणोर्महद्वदग्रहानापत्तेश्चेत्यपिद्रष्टव्यो। अनुभवेति।
वायुनेरूपवान्। परमाणुनेमाहान्। इत्यादिप्रसक्तप्रतीतीनांविलोपप्रसंगादि
त्यर्थः। योग्याचासावुपलब्धिश्चेतिकर्मधारयमभिप्रेत्याह। अत्रोच्यतइति। योग्यस
स्यविकरणंसहकारीतिमतथाचाभावप्रमाणस्यासमर्थविशिष्टाप्रतियोग्यनुपलब्धि
रित्यर्थः। अतएवसहकारिसंपन्नस्वरूपयोग्यत्वविशेषणादेवयोग्येति। यो

ग्यसंनिकर्षस्येवाभावप्रत्यक्षस्यमभीघटकत्वेनपरमाणोर्नपृथिवीत्वाभावग्रहः
इतिभावः।ननुमहत्त्वोद्भूतरूपवद्द्रव्येषणतायाःपृथिवीत्वाभावग्राहकत्वेपिनो
द्भूतरूपाभावग्राहकत्वंउद्भूतरूपाभावत्वंतिवायोतदसंभवादितिचेत्तत्रेंद्रियसं
बद्धविशेषणतायाएवसन्निकर्षत्वोग्यत्वमुपेयं।एवंचमनस्यपिउद्भूतरूपाभाव
प्रत्यक्षंस्यादितिदोषाभावेचेतिउद्भूतरूपाभावग्रहेइत्यर्थः।तथाचप्र
कृतेरूपमनिवेश्यमहत्त्वविशेषणीयमितिभावः।अतःमहत्त्वविशेषणात्तद्ग्रहः।उद्भूतरूपाभा
वग्रहःवायाविनिगमनातत्तद्ग्रहइत्यनुषज्यते।ननुमहत्त्वाभावग्राहकः कःसन्निकर्षः।एवंगुणादौपृ

थिवीत्वाभावप्रसङ्गानुपपत्तिः।तत्रेंद्रियसन्निकर्षमहत्त्वादिमद्विशेषणताविरहात्।एवम
न्योन्याभावग्राहकः योग्यःसंनिकर्षः कइत्यत आह।एवमन्यत्रापीति।महत्त्वोभा
वादावपीत्यर्थः।महत्त्वाभावेइंद्रियइंद्रि यसन्निकृष्टो द्वेतरूपवद्विशेषणतारूप
योग्यःसंनिकर्षः गुणादौ पृथिवीत्वाभावग्र हुइंद्रियसन्नि
कृष्टविशेषणतैवयोग्यःसन्निकर्षः।अन्योन्याभावेपृथिवीभेदादौइंद्रियस्य नि
कृष्टमहत्त्वादिमद्विशेषणतायोग्यःसंनिकर्षइत्यर्थः।ननुकुत्रचिदिंद्रियसन्निकृष्टम
हत्त्वादिविशेषणनाकुत्रचिद्धेंद्रियसन्निकृष्टविशेषतायोग्यःसन्निकर्षइत्यत्रकिं

नियामकमत आह। कार्यवशादिति। तत्र तत्र तदभावग्रहानुरोधादित्यर्थः॥॥न
नु पिशाचायंता भादो नामपि प्रसक्षापत्तिः। तत्र योग्यसंनिकर्षस्त्वेन योग्यानुपलब्धि
स्त्वादित्यत आह॥पिशाचायंता भावस्तिति। अयोग्यत्वादिति। प्रसक्षे विषयस्य
हेतुतया अभावप्रसक्षेयोग्याभावत्वेन हेतुत्वोपगमादितिभावः। अयोग्यप्रति
योगिकस्यापिस्तंभेपिशाचभेदस्यप्रस क्षोदयात्। अत्रेताभावएवपृछति। का
पुनरियंताभावग्रहेयोग्यतेति। उत्तरमपितत्रैवबोध्यं। योग्यमात्रेतिपिशाचस्यायोग्यत्वेन
योग्यप्रतियोगिक[illegible]केत्वाभावेनैवनतदभावादेवप्रसक्षमितिभावः। घटपिशाचाभेत

राभाववारणाय मात्रेति। अतींद्रियावृत्तिप्रतियोगिताकत्वमिति तदर्थः। ननु वायौरू
पस्पार्शाभावप्रक्षानुपपत्तिः। तस्यातींद्रियरूपवृत्तिप्रतियोगिताकत्वेन योग्यमात्र
प्रतियोगिकत्वाभावात्। एवमेतद्दुरुक्तम्। वदंताभावप्रमक्षापत्तिरित्यस्यैरदाहृतो
ग्यधर्मेति। पिशाचत्वघटत्वपिशाचात्यंतरत्वादीनां योग्यधर्मत्वाभावेननत द
वच्छिन्नाभावप्रत्यक्षमितिभावः। वस्तुतस्तु योग्यमात्रप्रतियोगिकेऽभावे योग्यध
र्मावच्छिन्नप्रतियोगिताकत्वविशेषणमित्येव पाठः। योग्यमात्रप्रतियोगिकाभा
वे योग्यधर्मावच्छिन्नप्रतियोगिकत्वविशेषणं योग्यतेत्यर्थः। योग्यमात्रप्रतियोगिक

त्वेऽपि योग्यधर्मावच्छिन्नप्रतियोगिताकत्वं योग्यत्वेति यावत्। तत्र भूतत्वेद्रव्यत्वसामान्याभावप्रत्यक्षवारणाय योग्यमात्रप्रतियोगिकत्वं। एतदुक्तत्वदृश्यताभाववारणाय योग्यधर्मावच्छिन्नेति। वा यौरूपसामान्याभावप्रत्यक्षंनेष्यत एवेति। नदसंग्रहोन दोषाय। एतद्रूपेतदुक्त्वात्यतरावच्छिन्नाभाववारणाय च योग्यधर्मस्य योग्यधर्मावच्छिन्नप्रतियोगिताकत्वमित्यर्थइत्येवध्येयं। ननुपिशाचत्वद्रव्यत्वाभावोप्ययोग्यत्वादेवनगृह्यतइतिवाच्यं। तत्राप्योन्याभावेकायोग्यतैवतानतावद्योग्यप्रतियोगिकत्वं। स्तेभेपिशाचभेदग्रहानापत्तेश्चापिशाचत्वद्वेदग्रहापत्तेश्चेसतआह। एवमप्यत्रापी

ति। अन्योन्याभावेपीत्यर्थः। अनुभवानुसारेणेति। तत्तद्भेदावच्छिन्नप्रतियोगिताकत्वमे
वतत्तद्भेदान्योन्याभावे योग्यत्वमित्यर्थः। अत एवकापुनरत्यंताभावे योग्यतेति। सामान्य
तएवात्यंताभावे योग्यतानिरुक्तेति। अन्योन्याभावेत्वननुगतैवसेति ज्ञेयं। सर्वैतिअत्यं
ताभावेऽयमर्थः। तत्किमिति। अत्यंताभावे योग्यमात्रेत्यादिरूपा। अन्योन्याभावे
तत्तदन्योन्याभावत्वमित्येवंरूपा। नानैवाभावे योग्यतेत्यर्थः। अं इति। अंगीकारार्थक
मव्ययं। गुणयोग्यतावदिति। यथारूपरसादौ तत्तदिंद्रिये योग्यत्वं नैकंतथाप्रकृतेपीत्यर्थः। के
चित्तु। विजातीयचक्षुःसंयोगाश्रयविशेषणतायाः अभावग्राहकत्वेन परमाणौ नपृथिवी

१०० त्वाभावग्रहः। तथापि ज्ञाचार्यः तत्ताभावादिप्रत्यक्षवारणंतु गुरुत्वादिवत्तादात्म्येनतत्तद्भाव
त्वेनसाक्षात्कारप्रतिबंधकत्वांगीकारेणेत्याहुः। तदसत्। परमाणोर्महत्त्वाभावप्रत्यक्षानु
रोधेनविजातीयचक्षुःसंयोगस्यावश्यकतयावेनतत्र पृथिवीत्वाभावप्रत्यक्षवारणासं
भवात्। पूर्वंकेचक्षुरादिकंलक्षयितुंपृच्छति। अथकिमिदमिति। तेजसमिति। आलोकघ्रा
णादावतिव्याप्तेर्यथायथमुभयोपादानं। चक्षुषस्तेजसत्वेविवादादाह। रूपग्राहकमि
तिरूपग्राहकमात्रोक्तौमनस्यतिव्याप्तेरतोमहदिति। महदिंद्रियत्वमात्रोक्तौ घ्राणादावति
व्याप्तेरतोरूपग्राहकमितिरूपग्राहकेमहदित्युक्तावात्मन्यतिव्याप्तेरतइंद्रियमिति। अत्र

केचित्। चक्षुषः प्राप्यकारित्वे चंद्रमसो ग्रहणानुपपत्तेः। शीघ्रत्वाच्चंद्रमसो रश्म्यल्पत्वाच्च
लंबनानुपपत्तेश्च। प्राप्यकार्यत्ववद्वाच्यं। एवं चाप्राप्यकारित्वादिदोषात् गोलमेव चक्षुरि
ति पार्थिवं चक्षुरेवतस्येत्याहुः। तदसत्। चक्षुषः प्राप्यकारित्वेऽपि मीलितनयनस्यापि चाक्षुषापत्तेः। प्राप्यकार्यत्ववद्वाच्यं। चक्षुषस्तेजसत्वेनातिशीघ्रगामितया चंद्रमस्संयोगउपपद्यते। शीघ्रत्वाच्चंद्रमसोरश्म्यल्पत्वात्कालेग्रहणंचक्षुषिसिद्धं। मयायुगपच्छतपत्रपत्राणिछिन्नानीतिवत्। तथाचगोलकस्यघटादौसंयोगाभावेनातिरिक्तंतैजसं चक्षुषःस्वीकार्यमिति। एवमन्यत्रापिबोध्यं। वायवीयमिति। वायवीयंचमानंवायौ।

इंद्रियत्वमाह चक्षुरादावतिव्याप्तिमिति। मिलितोपादानं। त्वचो वायवीयत्वेविवादादाह।
स्पर्शग्राहकमिति। चक्षुर्मनआत्मनांवारणायविशेषणत्रयोपादानं। आप्यमिति। जल
चक्षुरादावतिव्याप्तिवारणायविशेषणद्वयोपादानं। रसनस्याप्यत्वेविवादादाह। रस
ग्राहकमिति। चक्षुर्मनआत्मनांवारणाययथायथंविशेषणत्रयोपादानं। पार्थिवमि
तिव्यावर्तनःपूर्ववत्। इंद्रियत्वं चाचक्षाद्वेतरोद्भूतविशेषगुणानाश्रयत्वेसतिघ्राणका
रणमनःसंयोगाश्रयत्वं। आत्मव्यतिव्याप्तिवारणायसंयतनिवेशः। गंधरूपवि १०१
शेषगुणवत्त्वेऽव्याप्तेः गंधेतरेतिगुणविशेषणं। चक्षुषिताद्दशस्पर्शरूपस्यसत्वादुद्भू

तेति।उद्भूतरूपेनीलत्वादिव्याप्यानुद्भूतत्वाभाववैशेषिकमेव।तस्यचसंयोगादिसाधा
रणतयाचक्षुरादावव्याप्तेर्विशेषेति।चक्षुष्ट्वादेःसत्वात्गुणेति।कालादा
वतिव्याप्तेर्नीरूपेति।इंद्रियावयवसंयोगस्यापिप्रत्यक्षेकारणतयाइंद्रियावय
वेतिव्याप्तेर्वारणायमनःसंयोगेति।श्रोत्रंलक्षयतिकर्णेतिघटावच्छिन्नभसा
पिश्रोत्रत्वापत्तेःकर्णशष्कुलीति।नभसःश्रोत्रत्वेविवादादाह।शब्दग्राह्यकमिति।
मनोलक्षयतिनित्यस्पर्शेमितिमनोवैभववादिनांमीमांसकानांमतमादर्श
यति।अत्रमीमांसकाइति।अणुत्वाभावेसिद्धेपिनविभुत्वसिद्धिरतआह।किं

क्षिति।नित्यस्पर्शत्वंगुणादौव्यभिचरतीतिद्रव्यत्वादिति।द्रव्यत्वंघटादौव्यभिचरन्ती
तिविशिष्टहेत्वनुधावनंनत्वेतत्तन्तेमनस्त्वस्यनित्यस्पर्शगुणत्वप्रत्यासंपपत्तेनप
क्षतावछेदकासिद्धितेरंआह।मनस्त्वंचेति।आत्मत्वव्यावृत्तिप्रत्यायनायआत्मत्वंच
सतीति।संयोगाश्रयत्वंचक्षुरादिकालादावपीतिज्ञानासमवायिकारणेति।चक्षु
र्मनःसंयोगस्यज्ञानकारणत्वात्तज्ञानकारणसंयोगाश्रयत्वंचक्षुरादावतिव्या
प्तिमत्यन्तआह।अत्रसमवायीति।ज्ञानासमवायिकारणत्वंचौत्तमनःसंयोगएवे
तिनातिव्याप्तिः।केचित्तुनवीनमतेऽदृष्टविशेषाकृष्टतूलेमनस्त्वेनपक्षतावछेदक

स्यैक्याभावात्। कथं पक्षतावच्छेदकावच्छेदेनानुमितिः। तृटेर्विभुत्वस्यबाधेन
कथंवातद्विभुत्वानुमितिरत आहामनस्त्वेचेतिज्ञानास्यमवायिकारणेति।
पुरुषांतरीयात्मप्रत्यक्षवारणायतत्तदात्ममानसत्वावच्छिन्नंप्रतितत्तदात्मम
नःसंयोगत्वेनहेतुतयाऽनंततृटीनामवच्छेदकत्वकौटौनिवेशोगौरवेणनताद्य
वेनैकमनसःसिद्धिः। नचविजातीयसंयोगत्वेनतत्स्यहेतुतयानतत्तन्मनसो
निवेशाइतिवाच्यं। तथापिसमवायेनविजातीयसंयोगस्यविजातीयसंयोगस्य
संबंधेनमनसोवाहेतुत्वमितिविनिगमनाविरहादितिभावइत्याहुः। विभुत्वे
ध

मनसोऽविभुत्वे॥संयोगानुपपत्तेरिति॥तथाचोपदर्शितानुमानेपक्षावच्छेदका
साधिःबाधश्चेतिभावःकर्मजः॥यथास्येनक्रिययास्येनवृक्षसंयोगः॥अवयवसंयोगजः
कारणाकारणसंयोगात्कार्याकार्यसंयोगःयथाहस्ततरुसंयोगात्कायतरुसंयोगः॥
त्यर्थःनचविभारिति विभुत्वंहिमूर्तेरद्रव्यंस्पर्शवत्वावच्छिन्नंप्रतिमूर्तत्वेनकारणतयो
भूर्तत्वाभावेननात्मनिकर्मोत्पत्तिरितिभावःअनयोरात्ममनसोःसंयोगजः॥अ
वयवसंयोगजः॥नानाभावादिनित्यसंयोगग्राहकप्रत्यक्षाभावात्॥अनुमान
स्याप्रयोजकत्वात्॥इत्यर्थःसाधकाभावमुक्त्वाबाधकमप्याहसंयोगत्वावच्छेदेने

तिसंयोगत्वावच्छिन्नंप्रतिद्रव्यत्वेनहेतुतायांतत्कार्यतावच्छेदकेजन्यसंयोगत्वमे
वनित्यसंयोगांगीकर्त्तव्यं॥कार्यमात्रवृत्तिधर्मस्यैवकार्यतावच्छेदकत्वा
त्।तथाचजन्यत्वनिवेशेगौरवमेव।तत्स्वीकारेप्रतिकूलतर्कइतिभावः।ननुस
मवायेनरूपंप्रतिसामानाधिकरण्यसंबंधेनावयवरूपादीनांहेतुतयाक
पालगंधादावपिरूपोपपत्तेःजन्यसंयोगत्वावच्छिन्नंप्रतिद्रव्यत्वेनहेतुत्वाव

श्यकतयासंयोगत्वावच्छिन्नंप्रतितद्धेतुत्वेमानाभावइतिनदर्शितगौरव
मतआह।अप्रयोजकेचेदमितिायद्वानित्यवृतिधर्मस्यापिकार्यतावच्छेद
केक्षतिविरहादिपतआह।अप्रयोजकेचेदमितिाइदंविभुत्वसाधकम
नुमानमित्यर्थः।संयोगत्वावच्छेदेनेतिासंयोगत्वस्यद्रव्येवैयाप्येननित्य
संयोगस्वीकारेतादृशनियमभंगप्रसंगादितिभावः।ननुतादृशनियमेमाना

भावइ सत आह। अप्रयोजकं चेद्मि तीय परे॥ध्॥ना नातर्कविचारपौकम
तिनायत्किंचिदुक्तमयातद्देहंतु हृदाविभाव्यसुधियस्तकार्थसंग्राह
काः। हृद्येतद्यदिधार्यतेपिजनःसंजायतेसोचिरात्वांदीद्रः परवादि
द्विपणशाताधानैकदक्षःकृती॥इति श्रीविद्वन्मकुटमाणिक्यराजिनि
राजननीराजितपदद्वंद्वप्रायवागीशश्रीदिक्षितश्रीकंठशर्मविरचितायांव्याप्ति
सिद्धांतमंजरीदीपिकायांप्रथमपरिछेदःसमाप्तः॥॥॥४४॥श्रीश्रीश्रीश्री॥